2019

**B.A.**

**3rd Semester Examination**

# SANSKRIT (Honours)

**Paper - C 5-T**

Full Marks : 60 Time : 3 Hours

*The figures in the margin indicate full Marks. Candidates are required to give their answers in their own words as far as practiable. Illustrate the answers wherever necessary.*

1. अधोनिर्दिष्टेषु यथेच्छं दश प्रश्नाः समाधेयाः संस्कृतभाषया देवनागरीलिप्या चः $10 \times 2 = 20$

(क) विक्रमोर्वशीयम् इति नाटकस्य नायकः कः? का च नायिका?

(ख) मालतीमाधवं कीदृशं रूपकम्? माधवः कस्य पुत्र आसीत्?

(ग) अभिज्ञानशकुन्तले कीदृशी प्रस्तावना विहिता?

(घ) ब्रह्मचारी किमर्थं लावाणकग्रामं त्यक्तवान्?

(ङ) 'अर्थो हि कन्या परकीय एव'—इति श्लोकः सम्पूर्ण लिखत।

(च) वासवदत्तायाः वीणायाः नाम किम्? अङ्गारवत्या प्रेषिता वासवदत्ताधात्री का?

(छ) मुद्राराक्षसस्य प्रथमद्वितीयाङ्कयोः नामनी लिख्येताम्।

[ Turn Over ]

(ज) रत्नावली का? तस्याः पितुर्नाम किम्?

(झ) कुलपतिः किमर्थं सोमतीर्थं गतः?

(ञ) कः महासेनः? का च अङ्गारवती?

(ट) चन्दनदासः कः आसीत्? स कुत्र निवसति स्म?

(ठ) 'सखे वर्णय कुसुमपुरवृत्तान्तम्'—कः कमुद्दिश्य कुसुमपुरवृत्तान्तमपृच्छत्?

(ड) महावीरचरिते शूर्पणखा किं रूपमाश्रित्य कां मन्त्रणामददात्?

(ढ) स्त्रीचरित्रवर्जितं नाटकं किम्? तत्र कति अङ्काः सन्ति?

(ण) महाभारताश्रितभासनाटकानां नामानि लिखत।

2. अधोनिर्दिष्टेषु यथेच्छं चत्वारः प्रश्नाः समाधेयाः (एकस्य प्रश्नस्य उत्तरमवश्यमेव सुरगिरा देवनागर्या च प्रदेयम्) 4 × 5 = 20

(क) द्वयोः टीका कार्या—श्रीहर्षः, भट्टनारायणः, मृच्छकटिकम्, उत्तररामचरितम्।

(ख) एकस्य व्याख्या कार्या—

"सुखमर्थो भवेद्दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत्सर्वं दुःखं न्यासस्य रक्षणम्॥

अथवा

"प्रारभ्यते न खलु विघ्नभयेन नीचैः/प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः/प्रारब्धमुत्तमजना न परित्यजन्ति।।"

(ग) एकस्य व्याख्या कार्या—

"शान्तमिदमाश्रमपदं स्फुरति च बाहु कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र॥"

**अथवा**

"चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः।
न शालेः स्तम्बकारिता वप्तुर्गुणमपेक्षते॥"

(घ) भाससमस्या संक्षेपेण लिख्यताम्।

(ङ) अभिज्ञानशाकुन्तलस्य नान्दीस्वरूपं वर्ण्यताम्।

(च) मुद्राराक्षसस्य नामकरणं यथार्थं न वेति विचार्यताम्।

3. **अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः प्रश्नयोः उत्तरं प्रदेयम्—**

$2 \times 10 = 20$

(क) अभिज्ञानशाकुन्तलम् इति नाटकस्य चतुर्थाङ्कस्य नाट्यवैशिष्ट्यं लिख्यताम्।

(ख) स्वप्नवासवदत्तनाटकस्य प्रथमाङ्कवर्णितस्य बह्मचारिवृत्तस्य तात्पर्यं वर्ण्यताम्।

(ग) मुद्राराक्षसमिति नाटके राक्षसस्य चरित्रं प्रतिपाद्यताम्।

(घ) संस्कृतनाटकस्य उत्पत्तिः विकासश्च व्याख्यायेताम्।

---